षड् भ्रातृ-मथुरावास्तव्य-भट्ट पण्डित श्री गोविन्दोपाध्याय तनुज
भट्ट श्री रामकृष्णोपाध्याय [मणिचन्द्र] विरचिते

श्रीशसहस्रेद्वितीयं शतकम्

प्रकाशक
भट्ट ब्रजभूषण शर्म्मणा

अस्य सर्वोऽधिकारः प्रकाशकेन स्वायन्तीकृतः

जन्माष्टमी महोत्सव
सं० २०३१
(अगस्त १९७४)

मूल्य २.०० रु०

:: श्री ::

षड्भ्रातृ-मथुरावास्तव्य-भट्ट पण्डितराज श्री गोविन्दोपाध्याय
तनुज-भट्ट रामकृष्णोपाध्याय (मणिचन्द्र) विरचिते

श्रीशसहस्रे द्वितीयं शतकम्

१

श्री मद्गोवर्द्धन गिरिदरी स्थ गेहान्तराले ।
यूनोर्नूत्नप्रततरुण त्वामृताब्धेस्तरङ्गान् ।।
भाद्र प्रोद्यत्तरणि तनुजा वी चिहे वाक शिक्षा-दीक्षां ।
काञ्चित्पिपुरत उपाञ्च्यां नवैः [1]कैर्जवैस्तान् ।।
(नवैः स्तवैः)

२

अधि-गोवर्द्धन कन्दर-सदनं मति मोहनं किमपि ।
व्रीडोच्चाटन मीडे वल्लव सरसी रुहाक्षीणाम् ।।

३

गिरिवर कन्दर रत्नदने परस्पर प्रीति संश्रवस्फीतम् ।
गौरश्याम श्लेषण मसृणं सावर्ण्यमाश्रये सततम् ।।

४

अधि गोवर्द्धन गिरि दरिकाचन राधां प्रतीक्षमाणस्य ।
ललितां दृष्ट्वाऽऽह्वयतो मुरद्विषोऽति प्रसङ्गता जयति ।।

५

अधि गोवर्धन कन्दर मन्दिर मन्तः पुरं वन्दे ।
श्रैकान्तं कनक द्युति-कान्तं निगमान्ततान्त सिद्धान्तम् ।।

६

कुवल पङ्गी क्षणानां कुच युगला भोग गाहनाक्रमनम् ।
कुहचिद् व्रजमनु वन्दे, कुतुकैर्विभ्रान्त मिन्दिराकान्तम् ।।

७

राधे चिरान्निषाद स्थपतिं किन्न प्रतीक्षमाणंतम् ।
याजयसीत्यधि कुञ्जं शैव्या वाणी व्रजे क्वचिज्जयति ।

८

माधव कुञ्जे राधा-नूपुर रणितेऽत्र ललितायाः ।
रणरणकश्चित्तोद्यत्सामान्य विशेषताश्रयो जयति ।।

९

कुञ्जममासील्ललिता, राधापिभवेच्च तत्रेति ।
सम्बन्धः सान्निध्यं दिशति खलु विचारयन्निशुर्ज्जयति ।।

१०

राधे कुञ्जे युवयोः समा सगत वस्तु संनिगदन् ।
धम्मिल्लस्त्वेषति तेललिता वाणी व्रजे क्वचिज्जयति ।।

११

हरि कुञ्जा दायान्ती कुत्तोऽति विकलेति शैव्यया पृष्टा ।
ब्रुवती सस्मिति राधा, भिन्ना शक्तिः समास इति जयति ।

१२

पुलकित मुदितम्लानः समासकनित कमनीयतां कलयन् ।
कमला कामुक कान्ता-कायः क्वापि व्रजे जयति ॥

१३

सत्रात्र गितुं जदिते कृष्णे श्व श्रूञ्च सानयित्वैषे ।
राधोक्ति दिति जयति फल-मुखं क्वचिद्गौरवं न दोषाय ॥

१४

यामी त्यूक्त्या तुन्नं कृष्णं प्रति राधिका वचो जयति ।
दृष्ट्वाऽमितोऽन्तरङ्गे सत्यपि बहिरङ्ग चिन्तनं शक्यम् ॥

१५

सञ्चुम्बत्सूर्य्यांस प्रकर विगतेन्दीवर समम्,
विदद्गोमद्द्रामा हृदय मुपकल्पा कुल दशम् ।
स्तुवी मस्तद्गोवर्धन गिरि दरी हृद्य सदनम्,
श्रियः कम्रो यत्राहयति रमणीनां कुलगुरुम् ॥

१६

काले युक्ताभि सरण माश्रयतो स्तरुणयोर्व्रजे क्वापि ।
मृगमोहिकाः कयोश्चित्सोत्कलतां मुह्यमानयोर्वन्दे ॥

१७

अधि वृन्दावन कुञ्जं समवायत्वं दधद्यूनोः ।
सम्बन्धः संयोगो दीधीतां नूतनतां तन्वन् ।

१८

तद् गोवर्धन मीडे कन्दर सदनञ्च यत्र संयोगैः ।
नव्यै र्नव्यै र्यूनोः सम्बन्धः शस्यता मेति ॥

१९

भजमनो व्रजवल्लव गेहिनी हृदय राजि हरिन्मणि मुद्युतिम् ।
यदुदयोदित दीप्तिभरैर्मुहु-र्विशसितं तिमिरं शत जन्मजम् ॥

२०

घनवन नव वर्षाक्लिन्नवासो वहन्तीम्,
दलदल घुमनो जोच्छ्राय सौन्दर्य्य रम्याम् ।
गिरि गिरिवर गेहे श्लेष्टु माभीर भीरुं,
कमपि कमपि यासं सं श्रयन्तं स्तवीमि ॥

२१

प्रियक मुकुल दीव्यत्कर्ण पूराति कान्तम् ।
सपदि विगत निद्राम्बष्टिका शीर्ष भूषम् ।
प्रपद मभि विराजन्मल्लिका लम्ब नान्तम्,
कमपि तरल मीडे गोपिको रोज रूषम् ॥

२२

सहस्र फण मास्थितो व्रज गतो महावर्षणैः,
सहस्र नयनं नतं विततमन्तुकं मर्षयन् ।
स नाग दमनाभिधो नत जनान् मुहुर्वर्धयन्,
दयामृत महार्णवो जयतु देव दर्यार्द्र नः ॥

२३

व्रजमभिकृत वृत्र हाभिषङ्गां, गिरि गोवर्धन धारणैक शीलां ।
भवभृत कलुषैक वेमि दित्रीं, कमला कामुक कारिकां श्रयामि ॥

२४

चक्रारव्य बन्धुं ह्युडुचक्रनाथं, नेत्रे व्यधा च्चक्रमवाद थायुधम् ।
संसारचक्रात्कृपणस्य चक्रिः स्तं विश्व चक्राधिपतिं व्रजे भजे ॥

२५

श्रिमन्यं गत मायान्तीं काञ्चिदुद्भिन्न यौवनाम् ।
रुन्धन् वाग्भिर्दधिस्यन् स्वैः कमनो जयति व्रजे ॥

२६

राधिका यायिनीं दृष्ट्वाश्यामां दूराद्व्रजे विभुः ।
तां तथाऽऽकारयन् क्रूरं दृष्टो हीणः पिपर्त्तुनः ॥

२७

अधि शिखिरि वरेण्य रम्यगेहं,
कमपि परस्पर गौरकृष्ण योगम् ।
मिलदमरधुनी कलिन्द कन्या,
तरल तरङ्ग विडम्बनम् श्रयध्वम् ॥

२८

गिरिकूट बन्धुतां यौ दधतौ दधतीं कुचौ गवां पालीम् ।
सारस सह वुध्व दृशौधियतीं ध्यायन् विभुर्ज्जयति ॥

२९

बर्हिण चन्द्रक चूडं गोकुल ललना कुच कृत नव शोभम् ।
यमुना कूल क्रीडं व्रजभूषण मभंगुरं वन्दे ॥

३०

कञ्चुक मपगूहन्तीं ह्रीतामनु तिष्टते ललिताम् ।
पीन पयोधर वीक्षा-क्षणे जयति कौतुकी कृष्णः ॥

३१

स्नातुं यामुन पुष्करे मृगदृशा जातु प्रवृत्येत चेद्,
यातुं तत्तट मप्यहं रहसितां भ्रातुः परोक्षं गतः ॥

ख्यातुं यामि च भामिनीं ननुमिथोलातुं मुहुः श्लेषणम्,
पातुश्चेति मतिर्व्रजेऽथ जगतां भातु प्रमोदाय वः ॥

३२

उत्क्रामद् व्रज कामिनी पृथु कुचा भोगस्फुरत्कुंकुमाऽऽ-
लेखाऽऽमर्दन सन्दधद्रदृढ परी रम्भोन्मिषन्निर्वृतिम् ।
पौनः पुण्य समुन्नमत्क्रम सुधा धारा सहस्रं दधाम्,
काश्चित्सम्प्रति तोष्टवीमि कमला जाने निकुञ्ज क्रियाम् ॥

३३

कम्रेण गोप सुदृशां चिरमीक्ष्य माणं,
वृन्दावने मदन केलि गृहान्तरङ्गे ।
शीत द्युतेर्जल मुचा मविना भवत्व,
सौन्दर्य्यसार मिह सार्वदिकं श्रयामः ॥

३४

हरि रूप कुञ्जं दृष्ट्वा गोप वधूटीं व्रजो परोधंगाः ।
तूर्णं नियम्य यास्यन् सङ्कसुको गोकुले जयति ॥

३५

श्री गोवर्धन कन्दरोद वसिता ग्रप्रस्तरे तिष्टतो यूनोः,
नृत्य वलाहकानुगमन प्रोन्मीलिनी भिः क्वचित् ।
भाभिः सान्ध्य दिवाकरस्य विचितं साधर्म्य माविप्रश्रतो,
नीलेन्द्रोपल पद्मराग वलितोन्मेष क्षणो राजताम् ॥

३६

श्रृञ्ज सान द्युतिं वन्दे जुहुराणं व्रजे नवम् ।
पापार्श सानं नमतां शिश्विदानैक सेवितम् ॥

३७

मदन मदन वैस्तैर्विभ्रमैर्नस्तुदन्ती,
जघनज घन कान्त्या चित्त मुन्माथयन्ती ।
चलति चलति केति प्रेक्ष्य सौवर्ण वर्णां,
जयति मनसि तन्वन् राधिका मिन्दिरेशः ॥

३८

धृत नमदुपकारं शीर्ण चित्तान्धकारं,
कृत दुरित निकारं क्लृप्त दुष्टापकारं ।
प्रणतहत विकारं वल्लवी चाटुकारं,
गिरिवर धृतिकारं नौम्यहं विश्वकारम् ॥

३९

तरणि दुहितृ चार गोपिका नव्य मारं,
विषधर मदशारं रोहिणी व्रात नारम् ।
अनिश पशुप पारं सर्व सिद्धान्त सारं,
धृतं गिरिवर भारं नौम्यहं विश्वकारम् ॥

४०

स्वधितिं महापङ्कमहीरुहाणामज्ञान तामिस्र भरोष्णदीधितिम् ।
सहसान पिच्छं व्रजसुन्दरीणां नेत्रैक पेयं जुहुराण माश्रये ॥

४१

कर सन्धृत कन्दरं सतर्षोत्कल माभीर वधूं प्रतीक्षमाणम् ।
कटि कल्पित हस्त मिन्दिराया वजहद्यौव नभा श्रयामि नित्यम् ॥

४२

गिरि कन्दर मन्दिरे शयानां कुपितां गोपवधूं कृत प्रतीक्षाम् ।
कमलेशितु रासतु प्रकारो नमतो मुग्ध विदग्धतानु वृत्तः ॥

ललिताकृतवेदिका प्रकारः सुवलानीत समस्त हव्य भारः ।
उपवर्द्धित राधिकानुहारः शुभति श्रीपति गुण्य नव्य वारः ।।

४४

श्री गोवर्धन कन्दरा गृहवरे शैय्यां क्वचित्कल्पयन्,
पुष्पैः कोऽपिन बोद्धवै र्ललितया सम्पादितैः सोच्छ्रयम् ।
काश्चिद्वाल कुरङ्ग केतनरुचेः सौभ्रात्र मातन्वतीं,
नील क्षौम पटावृतां विजयते संवीक्षमाणो द्युतिम् ।।

४५

श्रीमद् वृन्दावन वसुमती मालती मञ्जु कुञ्जे,
वासन्ती नां वलय युगलं यूथिका पारितथ्यं ।
हारं रम्यं वकुल कलितं सप्तला सप्तकीञ्च,
स्पर्शं स्पर्शं जयति ललिताङ्गे पु यच्छन्मुकुन्दः ।।

४६

यूथिका ग्रथित सप्त यष्टिकां, राधिका कुच युगं क्वचित्स्पृशन् ।
धारयन्नधिगलं मुधा मुहुः साधयञ्जयति यष्टिका हरिः ।।

४७

अकुण्ठित कलानिधे रुपगताः क्वचित्तारकाः,
क्वचित्कनक वल्लरी फलयुगे तुषारच्छविः ।
सतर्ष मिति राधिकां क्ल ममितां रते भावयन्,
प्रगे गिरि गृहे व्रजे विजयते रमा वल्लभः ।

४८

मुकुट धरं वनमालं सुललित वेशं विलोक्य विभुम् ।
क्षणमुदिता या यावक रेखा खिन्ना व्रजे वधूर्जयति ।।

ललितागृ हान्तरङ्गे पुनरागमनाय वेत्र मादधती ।
गोप्तुं कमला जानेर्जयति तमां वः शुभं दिशती ।।

५०

अधि कुञ्जं यूथिकया क्षिप्तोऽपि पुनः पुनर्व्रजे मधुपः ।
स्पर्शं स्पर्शं कश्चन समुदं तां नर्तयञ्जयति ।।

५१

प्रचलति बहुलायासे श्वासे मुहुः कफ उद्गते,
भ्रमि तति मिते चित्ते नेत्रे स्थिरत्व मुपागते ।
ननु जिग मिषवत्सु प्राणेषु सत्सु विभो प्रभो,
व्रजवर तवाङ्घ्रयब्ज द्वन्द्वं भवेच्छ रणं मम ।।

५२

अयि सुन्दरी किं ब्रूमः व्यहतर्षं मध्विदं पिबा मीति ।
अधि वृन्दाबन कुञ्चं माधव वचनं व्रजे जयति ।।

५३

श्री गोवर्धन कन्दरागृहवरे शैय्यां क्वचित्कल्पयन्,
पुष्पैः कोऽपिनवोद्भवैर्ललितया सम्पादितैः सोच्छ्वयम् ।
काश्चिद्बाल कुरङ्ग केतन रुचेः सौभ्रात्र मातन्वतीं,
नील क्षौमपरावृतां विजयते संवीक्षमाणो द्युतिम् ।।

५४

शनकैर्विवृतौ विदधत् पादा वुपधाय मे मुधा शेषे ।
पुलकान्दधती ब्रुवती गिरिधरमिति राधिका व्रजे जयति ।।

५५

ललिता गृहान्तरङ्गे पुनरागमनाय वेत्र मादधती ।
गोप्तुं कमला जानेः जयतितमां वः शुभं दिशती ।।

अप्यघयसि किं राधे, कटाक्ष नाराच बिद्ध विधुम् ।
द्रुतमूर्जय जयतीत्थं ललिता वाणी व्रजे क्वापि ॥

५७

सुमनोनिलये नमेऽस्ति काङ्क्षा सुमनो मञ्जुलकानने न निष्ठा ।
सुमनो विसरे स्थितिर्भवेन्मे सुमनोऽलङ्कृत माधवेऽनुरक्तिः ॥

५८

कटु कूणन्तं कीचक-कलित क्वणनं कलिन्दजा कूले ।
केवे कमला कमनं कुर्वन्तं कामिनी कुसितम् ॥
(कादि पद बन्धं चित्र काव्यम्)

५९

कलिन्द कन्या कमनीय कूले: कदम्बकुञ्जे करवीर कोरकान् ।
कचेषु कुर्वन् करभोरु कम्रः कुचेकर क्रन्ततु कल्मष क्रमान् ॥

६०

मधुनाशिनोऽतिवेलं मधुनाऽधर जेन जात वैहस्त्याम् ।
मधुनाऽत्येधित कम्पा-मधुना भविकाय राधिकां वन्दे ॥

६१

मधुना मञ्जुल समये मधुनाशन दृढ़निगूहना कलिताम् ।
मधुना बहुलं विकला मधुनाधर जेन राधिकां वन्दे ॥

६२

वृन्दारण्ये लटभललना पाङ्गभङ्गोन्मिषद्भिः,
स्वान्तरे स्वैरं तरल रुचिराद भ्रवीक्षा तरङ्गैः ।
यातायातं गिरिवरदरी मन्दिरान्तर्वृणानो,
मार्गं पश्यन् दिशतु सुदृशः श्रीधवो भावुकं वः ॥

६३

वृन्दावने मञ्जुल कुञ्ज गेहे, सौदामनी नोरदयोः सतर्षम् ।
उग्रद्युवत्व प्रति रम्य वृत्तिस्तौम्येक शेषत्वमनु प्रवृत्तम् ॥

६४

कैश्यम संयतमधरो विराग उच्चावचं भवद्वक्षः ।
राधामनु ललिताया जयति समूहा वलम्बनं ज्ञानम् ॥

६५

अधिवृन्दावन कुञ्जं कालिन्दी वीचिवेल्लनानुकृतम् ।
उपतिष्ठमान मीडे तापिच्छं हेम पुष्पिकां रहसि ॥

६६

भवताभिदुरं नमतां जगतां प्रजनिष्णुतां मुहुर्दधतम् ।
कञ्चन गोकुल वल्लव रमणी मणि कामुकं नौमि ॥

६७

कुह चिद्वृन्दाविपिने कुञ्जान्त र्नीलपीतयो र्नौमि ।
भेद सहिष्णुम भेदम् कुसुमायुध कौतुकोत्कनितम् ॥

६८

कलुषं समूल कापं कषन्त मुपशीलये सततम् ।
अधि वृन्दावन कुञ्जं कञ्चनतापिच्छ चम्पिकाऽऽश्लेषम् ॥

६९

कुरव कलक्ष्म्या कलितं तापिच्छ स्योज्वलं क्रमं कमपि ।
उप गोवर्द्धन गह्वरमा भुग्न पयोधरं स्तौमि ॥

७०

उपगोवर्द्धन कन्दर मासीत्कारं पयोधर क्रमितम् ।
महिते मेघस्तनिते स्तवीमितं ह्लादिनीघनाऽऽश्लेषम् ॥

७१

अधिगोवर्द्धन कन्दर मनङ्ग रसवी चिदृत्तयो र्यूनोः ।
काऽहं कोऽहं किमिदं कयोश्चिदिति विगत भावनं जयति ॥

७२

इह वहु दहितः कालोनापादिति राधिकाधिकं तुदितः ।
अधिगोवर्द्धन गेहं गोप वधू परिवृढो व्रजे जयति ॥

७३

मरकत भावि सरोद्यद्धे मद्युति संहति स्निग्धम् ।
निरुपाधि भाव बन्धं गोवर्द्धन कन्दरागृहे वन्दे ।।

७४

अधिगिरि गह्वर सदनं वलद्वलय किङ्किणीक्वणश्लाघ्यम् ।
चापल्यं वन्दे व्रज - यूनोस्ता रुण्य सार्थिता महितम् ।।

७५

द्विः केशान्कलयित्वा राधा कुचयो र्निवेशयन् हारम् ।
स्पर्शं स्पर्शं श्रीशो धृताति तर्षो व्रजे क्वचिज्जयति ।।

७६

यौ व्यतिभाते भासोर्दानादानं मुहुर्वितन्वानौ ।
अधिगोवर्धन गह्वर-गेहं तौ ह्लादिनी घनौ नौमि ।।

७७

प्रति गुञ्जन्नलि कुञ्जं नवतरुणी मञ्जरीः क्वचिच्चुम्बन् ।
भवतां भवतां भवन् कश्चन मधुपो व्रजे जयति ।।

७८

कारं कारं यमुना-सलिलैः क्रीडां मुहुर्विधुस्तूर्णम् ।
कान्तानि वहैः श्रान्तो गुप्तोऽसौ गौत्र गह्वरे जयति ।।

७९

कमना गमनं प्रतीक्षमाणां मुकुरान्स्वं परितोनिधाय राधाम् ।
चिकुरान् रुचिरं प्रसाध्यभूयः प्रणमामोऽपरथा प्रकल्पयन्तीम् ।।

८०

श्री गोवर्धन गोत्र धारि चरणाम्भोज द्वयोत्सं सदा ।
शे श्रीये सरसीरु हासन विरूपाक्षाऽऽदिते याधिपान् ।।
उच्चै,र्नैज सुधारसैः परि पुनन् सांसारिकान् पङ्कतो ।
मग्नानुद्धरयन् य आश्रित जनान् तापादवन् त्वेषते ।।

८१

गिरिवर गह्वर सद्मनि केचन शम्पा भ्रसाम्य मादधती ।
तारुण्ये अनवद्ये हृद्ये अन्योन्यमाश्रिते ईडे ॥

८२

अधि वृन्दावन कुञ्जं कान्तिम् काश्चिच्छ्यामहे महिताम् ।
नीलाम्बुज मनुवृत्तां व्यस्तामपिननु समस्ततां दधतीम् ॥

८३

अधि गोवर्द्धन कन्दर-रत सदनं दीव्य दोषधीं काचित् ।
मृत्तिकयाऽन्तर यन्ती माधव वनिता व्रजे जयति ।

८४

अनुयमुना तट मुदजं कञ्चन कुर्वाण माश्रये जगताम् ।
कर्त्तारं भर्त्तारं हर्त्तारं गोप कामिनी कमनम् ॥

८५

कञ्चन गोपवधूटी हृदय हरिन्नवमणिं नुमो नित्यम् ।
कनयति यस्य च कान्तिः काल त्रयमप्य बाधिता निखिलम् ॥

८६

पश्यन्नपि नहि पश्यन् परिषदि महता मधोमुरवो राधाम् ।
चेतः स्थिरयन्न वदन् वेधकइव माधवो व्रजे जयति ॥

८७

पत्र द्वैत मिव भवति तदि तर इतरञ्च वीक्षते नूनम् ।
सजयति राधा माधव कमितव्यः केतकी कुञ्जः ॥

८८

सृष्ट्वा धृत्वा जगतां व्यापारस्य प्रयोजकं वन्दे ।
योऽधि व्रजमा भीरी नयन प्रान्त प्रयोज्यतां धत्ते ॥

८९

कालिन्दी कूल कादम्ब कूजत्कोकिल के वितें ।
कुस्यन्तं कामिनीं कुञ्जे कमला कामुकं कवे ॥

९०

अनिशमनु घृणोतु राधि कोद्यत्कुच शिखर प्रविहारि हारयष्टिः ।
विधृत धर धुनी विलास मैत्री, मुदरिपु पाणि घनं प्रपर्चयन्ती ॥

९१

जयति हेम मही धरयोः क्षिपत् क्षणेविभाकलितं घन सङ्गम् ।
कनक यष्टि वलद्व्रज वल्लवीकुच मृशद्धरि हस्तनिगूहितम् ॥

९२

वन्दे व्रज मृगनयना नयनान्त प्रेक्षणै र्वश्यम् ।
यस्ये क्षणं ननु शमन् शमन् प्रभविष्णुतां क्षणं धत्ते ॥

९३

तरणि तनु जनुर्निकुञ्ज गेहे कमपि कवेऽसितकण्ठ कण्ठभानोः ।
अतनु कुमुदिनी कुटुम्ब कान्त्या प्रणय मजस्र मजय्यं सङ्गतोत्थम् ॥

९४

गिरि गोवर्द्धनकन्दर मन्दिर शय मभिक माश्रयेकञ्चित् ।
भेद सहिष्णुरभेदः साध्यो येनेष्यते कुरङ्गाक्ष्या ॥

९५

कलिन्द कन्या कमनीय कूल कदम्ब कुञ्जे कलिताश्रयां श्रये ।
वितार्पितापिच्छ घुणद्वृणीनां त्विषोन्मि षन्तीं नवयूथिका द्युतिम् ॥

९६

अधिकंस रुचोऽवतार भाजो व्रज आवास वतोऽच्युतस्य वन्दे ।
प्रथमं करणीयमच्युतत्वम् पशुपाली स्मरकेलि लेय वृत्तेः ॥

९७

वृन्दा वने घन ममोघ मनोज रम्यक्रीड़ा प्रगल्भ कलनं कमोपि श्रयामः ।
नव्या नवद्य सुभग क्षण वृत्ति विभ्रत्सौदामनी नहि जि हासतियं क्षणाय॥

९८

सङ्गतंमित सुवर्ण विभाभि र्नील वासवमणेः सहहेलाम् ।
हेडयद् व्रज मही मनु नौमि म्लेडयत्किमपि मार विलासम् ॥

९९

अधिगोवर्धन कन्दर सदनं व्रजक त्रयोः किमपि सरसम् ।
विषयान्तर परिहारा दनन्य विषयावलम्बनं जयति ।।

१००

पशु पति युवती सहस्र मध्य स्थिति ममलां दधतं व्रजेश सूनुम् ।
कुहच नच पलासहस्र दीप्पन्नवमुदिरंश्च परा भवन्त मीडे ।

१०१

भास्वत्सुतां श्रीश ! जना प्रवेश्य-स्थला मयामः स्तनशद्रुनीराम् ।
एवं समीहां ललिता गदन्ती धृणोत्वमन्दं प्रमुदं दिशन्ती ।।

१०२

कश्चि द्धि भातु सारसीरु हलो चनायाः ।
स्वैरा धरा सवरस व्यतिधित्सयोत्कः ।।
गोवर्धना चल दरी सदने प्रतीक्षां ।
कुर्वन्क चिद् व्रज मही कमन प्रवेकः ।।

१०३

श्री गोवर्धन कन्दरा गृहवरे मध्ये दिंन रागिणः । श्री कान्त-स्त जयन्ति ता बहुति थाः । पर्य्यङ्क मास्तृण्वतः । माभूत्क श्चन राधिका मनसि सन्देहोऽत्र काप्यागते-त्येवं चेतसि कुर्वतोऽखिल नवत्वा पादने कारिकाः ।।

१०४

यो गोवर्द्धन कन्दरा नु वसना जस्र स्फुरन्मानसो
गोमत्पक्ष्मल लोचना वर वशा सत्रा स्मरो द्यद्रसः ।
तं वन्दे नववारणं व्रजवनी तन्तञ्चना पाटवम् तन्वानं
तरणि प्रसूति सलिल स्नानोत्कलं श्रीधवम् ।।

१०५

सरसि सरोजं नीलं नरक्त मिति शैव्यया क्वचित्प्रोक्ते ।
राधाचेतसि तीव्रन्, रणरणकः कोऽपि साम्प्रतं जयति ।।

१०६

शैव्येऽराधांत्य हमिह नयेति भद्रान्नु गर्भिणीं नयसि ।
नयचा ब्राह्मण मति किं लोष्ठं नयसि ब्रुवन्हरिर्ज्जयति ॥

१०७

राधे पद द्वये किम युगपत्के नापि लक्षणा क्रियते ।
चन्द्राऽऽस्तेऽच्युत कुञ्जे भद्रा भणितिरिति भावुक तनुताम् ॥

१०८

जिहेति ग्राहे सति बिभेति कुचयोः क्व चित्कृते स्पर्शे ।
अधि गोवर्धन कन्दर मित्थं राधा धृतिर्ज्जयति ॥

१०९

यो गोवर्धन कन्द रागृहवरे तारुण्य भङ्गोत्कतां
विभ्रच्चन्द्रावुक वर्य्य वर्ग पण ना तुषत्सम ज्ञो सते ।
उद्यत्स्नेह समुत्सजन्नवनव व्यापार रम्यान्तरः सोऽयं
पक्ष्म ललो चना कुल गुरुन्मेष क्षणो मंहताम् ॥

११०

या यूनो रतिवेल राग पवना मन्दानु मञ्जून्म
थच्छलेषा मर्दन निंस नादि रमणोल्लोलो मिला स्यान्तरा ।
सा गोवर्धन कन्दरा गृह सरस्तारुण्य वारि,
स्फुरत्पारस्पर्य्य विशेषतानु घटनोत्केलत्कृतिः क्राम्यताम् ॥

१११

आयासीन्नव मालती मृदुलता साधर्म्य मागुम्फती,
सातपीत्परिरम्भणै रिति चिरं राधा मभिध्यायतः ।
केचिद्ग्राववरेण्य गव्हर गृहो पघ्ने प्रतीक्षां मुहुः,
कुर्वाणस्य हरेर्ज्जयन्त्यनुकलं सोत्कण्ठवीक्षा क्षणाः ॥

११२

द्वितीयं शतकं भह रामकृष्णेन निर्मितम् ।
सहस्रान्तर्गतं भाति श्री शितुः प्रतियेऽस्त्वदः ॥

समाप्तम्

एक आन्ध्र वेल्लयनाटीय संस्कृत महाकाव्यकार

(शास्त्री भट्ट रामकृष्ण (मणिचन्द्र) उपाध्याय)

संस्कृत साहित्य विश्व साहित्य में अपना विशिष्ट स्थान रखता है। भारत वर्ष में तो संस्कृत साहित्य की उत्कृष्ट एवं सराहनीय साहित्य-परम्परा रही है। मध्यकालिक संस्कृत-साहित्य-भण्डार में जो साहित्यिक कृतियों की सतत् अभिवृद्धि हो रही थी वह साहित्य-सृजन धारा आज भी अक्षुण्ण विद्यमान है। आज भी अनेक सरस्वती मां के वरद पुत्र अनवरत काव्य-साहित्य-सृजन कर वेदवाणी को समृद्ध कर रहे हैं। धन्य है ऐसे साहित्य आराधकों को जिन पर विद्या की अधिष्ठात्री सरस्वती गौरव अनुभव कर रही है किन्तु वर्तमान समाज ऐसे साहित्य तपस्वियों को उपेक्षित करता जा रहा है। यदि आज ऐसे मौन साहित्य विभूतियों के साहित्य का अंकनन किया जावे तो उन में से अनेक निर्विवाद उत्कृष्ट साहित्यकार सिद्ध होंगे। वर्तमान समय में शास्त्रीय भट्ट श्री रामकृष्ण (मणिचन्द्र) उपाध्याय संस्कृत साहित्य-जगत में मौन साहित्य-तपस्वी हैं :

आप संस्कृत साहित्य के उत्कृष्ट काव्यकार ही नहीं अपितु कर्मकाण्ड, वेद, सम्प्रदाय आदि के विशेष व मर्मज्ञ हैं। आपने निम्नलिखित संस्कृत काव्य ग्रन्थों का सृजन कर सहस्रावधि श्लोकों का प्रणयन किया है:—

१:- श्री शशतकम् २:-ब्रजेन्दु सप्तत्ति ३:- शिववल्लभ स्तोत्रम् ४:- ब्रजेवाचा: ५:- ब्रज-वल्लवी वाचिकम् ६:- देशिकालंकार ७:- विवाह वर्णनम् ८:- उपनयन वर्णनम् ९:- मगला शासनम् १०:- पञ्चाशत्समस्या पूर्त्तय: ११:- पाञ्चजन्य स्तव: १२:- द्वारकेश स्तुति: १३:- प्रकीर्ण श्लोका: १४:- गद्य निबन्ध १५:: वृत्त समुच्चय १६:- ग्रन्थ त्रयम् १७:- श्री शसहस्रे शतकम् आदि।

आपने रेडियो वार्तायें (हिन्दी भाषा) एवं उर्दू की गजलें व शेर आदि भी लिखे हैं जिनकी प्रथक प्रकाशन योजना क्रियान्वित करने का विचार किया जा रहा है। श्रीशशतकम्, ब्रजेन्दु सप्तति, शिव वल्लभ स्तोत्र ब्रजेवाच:, ब्रजवल्लवी वाचिकम् देशि-कालंकार व वृत्त समुच्चय, ग्रन्थ त्रयम् आदि प्रकाशित हो चुके हैं एवं श्री शसहस्रे द्वितीयं शतकम् संस्कृत साहित्य प्रेमियों व मर्मज्ञों को अवलोकनार्थ प्रदान किया जा रहा है। आपका विस्तृत परिचय उक्त प्रकाशित ग्रन्थों में प्रकाशित किया जा चुका है :

वास्तव में संस्कृत साहित्य मर्मज्ञ ही उक्त संस्कृत ग्रन्थों का परिशीलन कर काव्यकार की कठोर साधना का सही सही मूल्यांकन करेंगे। आपने अनेक विद्वज्जन सभा गोष्ठियों आदि में संस्कृत साहित्य पर समालोचनार्थ सुन्दर वार्त्तायें दी हैं। आकाश-वाणी जयपुर से नैषद्य चरित्र, भट्टकाव्यम् आदि पर अनेक आपने भावपूर्ण, तथ्यविश्लेष-णात्मक एवं अनुसंधात्मक वार्तायें प्रस्तुत की। आपके समग्र सस्कृत ग्रन्थों में शृङ्गारिक परिकल्पना भक्त भावना एवं प्रौढकाव्य तत्व का सुन्दर समन्वय मिलता है।

जिस प्रकार साहित्य समाज का दर्पण होता है उसी प्रकार रचनायें साहित्यकार के हृदय व समस्त व्यक्तित्व को प्रदर्शित करने वाली होती है। स्वयं संस्कृत विद्वान् काव्यकार की रचनाओं का अवलोकन कर साहित्य सम्बन्धी योग्या योग्त्व का मूल्यांकन करेंगे। इस अभिलाषा के साथ ही श्री शसहस्रे द्वितीयं शतकम् नामक ग्रन्थ समर्पित किया गया है।

प्र का श क–

ब्रजभूषण भट्ट

एम. ए. (हिन्दी साहित्य)

बी. एस. सी. एल. टी. साहित्य रत्न

ब्यावर (राजस्थान)

जन्माष्टमी-महोत्सव

सं० २०३१

(अगस्त 1974)

मुद्रक:—कमल प्रिन्टिंग प्रेस ब्यावर-305901